This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क. M2425 विषय स्तोत्र

नाव अथ रघुवंशे महाकाव्ये सर्ग-5

लेखक/लिपीकार .....

पृठ 22 काळ ..... पूर्ण/अपूर्ण

M2425

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ रघुवंशे महाकाव्ये पञ्चमसर्गारंभोयम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः दूर्वीवरदलश्यामंमिंदिरानंदकंदलं वंदारुजनमंदारंवंदेऽहंयदुनंदनम् नमिति विश्वजिति विश्वजिन्नाम्नि
अध्वरे यज्ञे यज्ञःसवोऽध्वरोयागदूत्यमरः निःशेषितंविश्राणिनंदनं श्रणदाने चुरादिः कोशानामर्थराशीनांजातंसमूहोयेनतं
तथोक्तं कोशोरत्नीकुड्मलेदिव्येशास्त्रेथौंघेगृहेतनाविति यादवः जातंजनिसमूहयोरितिशाश्वतः एतेन कौत्सस्यानवसरप्र

७ ७ तमध्वरेविश्वजितिक्षितीशंनिःशेषविश्राणितकोशजातम्
उपात्तविद्योगुरुदक्षिणार्थीकौत्सःप्रपेदेवरतंतुशिष्यः १ ७ ७

मिंसूचयति तंक्षितीशंरघुं उपात्तविद्योलब्धविद्यःवरततोःशिष्यःकौत्सः ऋष्यंधकेत्यण्वृद्धोपवादःगुरुदक्षिणार्थी पुष्क
रादिभ्योदेशाइत्यत्रार्थाच्चासन्निहितेनदंत्राच्चेतीनिः अप्रस्तारव्याख्येयइतिभावः प्रपेदेप्राप सर्गेसमन्वृनसुपजातिःतल्लक्षणंतुस्यादिंद्रव
ज्रायदितौजगौगउपेंद्रवज्रानतजास्ततोगौ अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजानयस्ताइति १ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति अनर्घशीलः अमूल्यस्वभावः असाधारणस्वभावइत्यर्थः मूल्येपूजाविधावर्घइति शीलंस्वभावेसइतिचामरश्चाश्व
मौ यशसाकीर्त्यापकाशनइतिप्रकाशः पचाद्यच् अतिथिषुसाधुरतिथेयः पथ्यतिथिवसतिस्वपतेर्ढञिनिढञ्प्रत्ययःसर
घुः हिरण्यस्यविकारोहिरण्मयंदांडिनायनादिसूत्रेणनिपातः वीतहिरण्मयत्वादपगतसुवर्णपात्रत्वात् यज्ञस्यसर्वस्व
दक्षिणाकत्वादितिभावः मृन्मये मृद्विकारेपात्रे अर्घ्यमर्घार्थमिदंपादार्घाभ्यांचेतियत्प्रत्ययः पूजार्थद्रव्यंनिधाय श्रुय
नइतिश्रुतं तेनवेदशास्त्राभ्यांप्रकाशंप्रसिद्धं श्रुतंशास्त्रावधृतयोरित्यमरः अतिथिमभ्यागतं कौत्सं अतिथिर्नागृ
हागतइत्यमरः प्रत्यज्जगाम संमुखंजगाम २ ७ ७ ७ ७ ७ ७

समृन्मयेवीतहिरण्मयत्वात्पात्रेनिधायार्घ्यमनर्घशीलः श्रुतप्रकाशंयशसाप्रकाशःप्रत्यु
ज्जगामातिथिमातिथेयः २ तमर्चयित्वाविधिवद्विधिज्ञस्तपोधनंमानधनाग्रयायी विशांपति
र्विष्टरभाजमारात्कृतांजलिःकृत्यविदित्युवाच ३ ७

नमिति विधिज्ञः शास्त्रज्ञः अकरणे प्रत्यवायभीरुरित्यर्थः मानधनानामग्रयायी अग्रेसरः अपयशोभीरुरित्यर्थः
कृत्यवित् कार्यज्ञः आगमनप्रयोजनमवश्यंमृष्टमितिकृत्यवित् विशांपतिर्मनुजेश्वरः द्वौविशौवैश्यमनुजावित्यमरः
विष्टरभाजमासनगतंउपविष्टमित्यर्थः विष्टरोविड्वीदर्भमुष्टिःपिठाद्यमासनमित्यमरः वृक्षासनयोर्विष्टरइति
निपातः तंतपोधनं विधिवत्विध्यर्हं यथाशास्त्रमित्यर्थः तदर्हमितिवतिप्रत्ययः अर्चयित्वा आरात्समीपे आ
राद्दूरसमीपयोरित्यमरः कृतांजलिःसन् इतिवक्ष्यमाणप्रकारेणोवाच ३ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्यग्रणीरिति हेकुशाग्रबुद्धे सूक्ष्मबुद्धे कुशाग्रीयमतिःमोक्तःसूक्ष्मदर्शीचयः पुमानितिहलायुधः मंत्रकृतांमंत्रद्रष्टृणां
ऋकर्मणापमंत्रेत्यादिनाक्विप् ऋषीणां अग्रणीःश्रेष्ठस्तेनवगुरुःकुशल्यपि क्षेमवान्किं अपिप्रश्ने गर्हासमुच्चय
प्रभेशंकासंभावनास्वपीत्यमरः यतोयस्मान्मुरोःसकाशात्तया अशेषंसमग्रंज्ञानं लोकेनोष्णरश्मेःसूर्यस्यै
तन्यंप्रबोधइवआतंस्वीकृतम् ४ कायेनेति कायेनोपवासादिकृच्छ्रचांद्रायणादिना वाचावेदपाठेन मनसापि गा

अप्यग्रणीर्मंत्रकृतामृषीणांकुशाग्रबुद्धेकुशलीगुरुस्ते यतस्त्वयाज्ञानमशेषमातंलोकेनचैतन्य
मिवोष्णरश्मेः ४ कायेनवाचामनसापिशश्वद्यदूर्ज्जितोधैर्यविलोपितन्नम् आपाद्यतेनव्ययमं
तरायैःकच्चिन्महर्षेस्त्रिविधंतपस्तत् ५ ६ ७

यत्रीजषादिनाकरणेन वज्रिणइंद्रस्यधैर्यंविलुंपतीतिधैर्यविलोपि स्वपदापहारशंकाजनकमित्यर्थः यत्तपः शश्वद
सकृत्मुहुःपुनःपुनःशश्वदभीक्ष्णमसकृत्समाइत्यमरः तमंअनुष्ठितंमहर्षेर्वरतंतोस्त्रिविधंबाङ्मनःकायजंतप
अंतरायैर्विघ्नैःशक्रप्रेषिताप्सरःशापैःव्ययंनाशंनापद्यतेकच्चिन्ननीयतेकिं कच्चित्कामप्रवेदनइत्यमरः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आधारेति आधारबंधप्रमुखैवः आलवालनिर्माणादिभिः प्रयत्नैरुपायैः आधारआलवालेबुबंधेधिकरणेपिचेतिवि
श्वयादवो सूतेभ्योनिर्गतोविशेषोऽतिशयोयस्मिन्कर्मणितद्यथातथा संवर्धितानांश्रमच्छिदांवोयुष्माकंआश्रमपाद
पानां वाप्यादिःआदिशब्दाद्दावानलादिःउपप्लवोबाधकंनकश्चिन्नास्तिकिम् ६ क्रियेति क्रियानिमित्तेष्वनुष्ठानसा
धनेष्वपि कुशेषु मुनिभिर्वत्सलत्वात् स्नेहाद्भग्नकामा अपति हतेच्छा तेषांमुनीनामंकाउत्संगा एवशय्याः प

आधारबंधप्रमुखैवः प्रयत्नैः संवर्द्धितानांसुतनिर्विशेषम् कश्चिन्नवाप्यादिरुपप्लवोवः श्रमच्छिदामाश्र
मपादपानाम् ६ क्रियाभिमित्तेष्वपिवत्सलत्वाद्भग्नकामामुनिभिःकुशेषु तदंकशय्याच्युतनाभि
नालाकश्चिन्मृगीणामनघाप्रसूतिः ७ ८

र्यंकास्तासच्युतानिपतितानिनाभीनांनालानियस्याःसातथोक्ता नालोनालमथास्त्रियामित्यमरःमृगीणांप्रसू
तिः संततिः अनघा अव्यसना कश्चिन् अनपायिनीकिमित्यर्थः अस्तीतिशेषःदुरेवेनाव्यसनेषघमितियादवः
तेहिव्याघ्रभयात् दशरात्रमंकेएवधारयंतीत्यर्थः ७ ८ ८ ८ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्वर्त्यन्तइति येनीर्थजलैर्नियमाभिषकोनित्यस्नानादिनिर्वर्त्यतेनिष्पाद्यते येभ्योजलेभ्योऽञ्जलेयेतिशेषः पितृणा
मग्निष्वात्ता दीनांनिवापांजलयः तर्पणांजलयः पितृदानंनिवापः स्यादित्यमरः निर्वर्त्यन्ते अत्रविभक्तिविप
रिणामः येभ्योयज्जलमादायेतिवा ल्यब्लोपेकर्मण्यधिकरणेपंचमीहेतोवानिवापपदेनपितृदानात्पितृपदो
क्तिः यज्ञंसार्थीउंछानांप्रकिर्णेहृतधान्यानांषष्ठेःषष्ठभागेःपालकत्वाद्राजग्राह्यैःअंकितानि चिन्हितानिसेक

निर्वर्त्यन्तेयेनियमाभिषेकोयेभ्योनिवापां ७
जलयःपितृणां तान्युच्छषष्ठांकित ७
सेकतानिशिवानिवस्तीर्थजलानिकश्चित् ८

तानिपुलिनानियेषांतानिनथोक्तानि वेयुष्माकंतानि तीर्थजलानि शिवानिभद्रानिकाश्चित् अनुपपूर्वानिकिमि
त्यर्थः उंञ्छोधान्यंन्नाआदानंकणिशांन्नार्जनंशिलमितिधादवः षष्ठाष्टमाभ्यांचेतिचकारात्षष्ठ्यन्ताद्भागार्थेअन्य
तयः अतएवापूरणार्थत्वात्पूरणगुणेत्यादिनानषष्ठीसमासमतिषेधः सिकताःसंतियेषुतानिसेकतानि सिकता
शर्कराभ्यांचेत्यणूप्रत्ययः कुसूलः कुंभिधान्योवाआहिकोश्वस्तनोपिवा जीवेद्वापिशिलोंञ्छेनश्रेयानेषांपरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीवारेति कालेषुयोवयकालेषूपपन्नानामागतानामतिथीनामभ्यागतानांकल्प्याः कल्पिनाभागायस्यतत्तथो
कंवनेभवंवन्यंशरीरास्थितेर्जीवनस्यसाधनंवोयुष्माकंपच्यतइतिपाकःफधौलन्यमितियावत् नीवारपाकादि
आदिशब्दात्श्यामाकादिधान्यसंग्रहःजनपदेभ्यआगतेर्जानपदैःततआगतइत्यण् कडंगरंबुसमर्हतीतिक
डंगरीयाः कडंगरोबुसंक्लीबेधान्यत्वचितुषःपुमानियमरःकडंगरदक्षिणाश्चचेतिछप्रत्ययः तेगोमिहिष्या
दिभिर्नीमृश्यतेकश्चिन्नस्पृश्यतेकिंनभक्ष्यतेकिमित्यर्थः १ अपीतिकिंचत्वं प्रसन्नेनसतामहर्षिणागुरु
नीवारपाकादिकडंगरीयैर्नामृश्यतेजानपदैर्नीकश्चित् कालोपपन्नातिथिकल्प्यभागंवन्यंशरीरास्थि
तिसाधनंवः १ अपिप्रसन्नेनमहर्षिणात्वंसम्यग्विनीयानुमतोगृहाय कालोह्ययंसंक्रमितुंद्विती
यंसर्वोपकारक्षममाश्रमंते १० णासम्यक्सूक्ष्मंविनीयशिक्षयित्वाविद्यासुपदिश्येत्यर्थः गृहायगृहस्थ
श्रमंप्रवेष्टुं क्रियार्थेपपदेसप्तम्यादिनाचतुर्थी अनुमतोप्यनुज्ञातः किंहियस्मात्तेतवसर्वेषामाश्रमाणांब्रह्मचर्यवा
नप्रस्थादीनांउपकारेक्षमंशक्तंक्षमंशक्तेहितेत्रिषियमरः द्वितीयमाश्रमंगार्हस्थ्यंसंक्रमितुंयास्तुमयकालो
स्ति विद्याग्रहणानंतरमायातस्येतिभावः कालसमयवेलासुतुमुनितुमुन्प्रत्ययः सर्वोपकारक्षमपित्यत्रम
नुः यथामातरमाश्रित्यसर्वेजीवंतिजंतवःवर्तंतेगृहिणंतद्वदाश्रित्येतरआश्रमाइति १० समाप्त ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुशलप्रश्नंविधायागमनप्रश्नंचिकीर्षुराह नवेति अर्हतःपूज्यस्य अर्हःपर्याप्तमितिन्यायात्प्रत्ययः तवा
भिगमेनागमनमात्रेणमेमनोनतृप्तं नसंतुष्टं किंतु नियोगक्रियया आज्ञाकरणेनोत्सुकमुत्कंठितं तस्मेप्रसितास
काविष्टार्थेद्युत्कउत्सुकइत्यमरः प्रसितोत्सुकाभ्यांतृतीयाचेतिसप्तम्यर्थेतृतीया शासितुर्गुरोराज्ञया अध्यात्मना
स्तनोवा महत्त्वादिभ्यउपसंख्यानमितितृतीया मांसंभावयितुं पवित्रीकर्तुं वनात्यागोसि गुर्वर्थंवातवागमनमित्यर्थः

तवार्हतोनाभिगमेननृप्तंमनोनियोगक्रिययोत्सुकंमे अध्यात्मयाशासितुरात्मनावाप्राप्तोसिसंभाव
यितुंवनान्मां ११ इत्यर्घ्यपात्रानुमितव्ययस्यरघोरुदारामपिगांनिशम्य स्वार्थोपपत्तिप्रतिदुर्बलाश
स्तमित्यवोचद्वरतंतुशिष्यः १२

प्रेयोनामायमलंकारःप्रेयःप्रियतमाख्यानमितिकाव्यादर्शे ११ इतीति अर्घ्यपात्रेणमृन्मयपात्रेण अनुमितोव्य
यःसर्वस्वत्यागोयस्यतस्यरघोः इत्थंप्रकारामुदारांऔदार्ययुक्तामपिगांवाचंमनोनियोगक्रिययोत्सुकंमेइ
त्येवंरूपां स्वर्गेषुपशुवाग्वज्रंदिव्येत्रघृणिभूजलेलक्ष्यदृष्टयः स्त्रियांपुंसिगोलिंगंचिह्नद्योफसोरित्यमरः निशाम्य श्रु
त्वा वरतंतुशिष्यः कौत्सः स्वार्थोपपत्तिंस्वकार्यसिद्धिंप्रतिदुर्बलाशाः सन्मृन्मयपात्रदर्शनोच्छिथिलमनोरथः सन्नर
घुमितिवक्ष्यमाणप्रकारेणावोचत्॥१२ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वचेति हेराजन् त्वंसर्वत्रनोऽस्माकंवार्तंरक्षास्थ्यमवेहिजानीहि वार्तंफल्गुन्यरोगेचेत्यमरः वार्तंपाटवमारोग्यंभव्यंस्व
स्थ्यमनामयमितियादवः नचैतदाश्चर्यमित्याह नाथेति त्वयिनाथेईश्वरेसति प्रजानामशुभंदुःखंकुतः तथाहि अ
र्थाप्तरंन्यस्यति सूर्यस्यादिना सूर्यंतपति प्रकाशमानेसति तमिस्रातमस्ततिः तमिस्रंतिमिरेरोगेतमिस्रातुतमस्त

सर्वत्रनोवार्तमवेहिराजन्नाथेकुतस्त्वय्यशुभंप्रजानाम्
सूर्येतपत्यावरणायदृष्टेः कल्पेतलोकस्यकथंतमिस्रा १३

नौ कृष्णपक्षनिशायांचेतिविश्वः तमिस्रंतिमिरंतमइत्यमरः लोकस्यजनस्य लोकस्तुभुवनेजनइत्यमरः दृ
ष्टेरावरणायकथंकल्पेत संपद्येतदृष्टिमावरितुंनालमित्यर्थः कृपेरलमर्थत्वात्तंद्योगेनभः स्वस्तीत्यादिनाच
तुर्थी अलमितिपर्याप्त्यर्थग्रहणमितिभवान् भाष्यकारः संपद्यतेकल्पतइत्यर्थः कृपेः संपदानेचतुर्थीवक्तव्या
१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदुक्तंतन्नचित्रमित्याह भक्तिरिति प्रतीक्ष्येषुपूज्येषुपूज्यः प्रतीक्ष्यइत्यमरः भक्तिरनुरागविशेषस्तेनतवकुलोचि
ताकुलाभ्यक्ता अभ्यस्तेयुचितंन्याय्यमितियादवः हेमहाभागसार्वभौम तथागत्यापूर्वान् पूर्वजानतिशेषेति
कथ्यवर्तसे किंतु सर्वत्रवार्तेचेत्तर्हिकथंखेदारविन्नइवदृश्यसे अतआह व्यतीतेति अहंतुव्यतीतकालाऽनिकां
तकालस्तन् अर्थिभावात् त्वामभ्युपेतआगतइतिमेममविषादः १४ शरीरेति हेनरेंद्र स्वतीर्थेषु सत्याश्रमेषु

भक्तिःप्रतीक्ष्येषुकुलोचितातेपूर्वान्महाभागतयातिशेषे व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति
मेविषादः १४ शरीरमात्रेणनरेंद्रतिष्ठनाश्रमेषुतीर्थप्रतिपादितर्द्धिः आरण्यकोपात्तफलप्रसूतिस्तंबेननी
वारइवावशिष्टः १५ ७

तिपादिता दत्ताऋद्धिर्येनसतथोक्तः योनोजलावतारेचमंत्रेषश्चदत्तास्वपि पुण्यक्षेत्रेतथापात्रेतीर्थेस्याद्दत्तंनि
वपतिहलायुधः शरीरमात्रेणतिष्ठन् आरण्यका अरण्यभवामनुष्यामुनिप्रसुरवाःअरण्यान्मनुष्यइतिवुञ्
प्रत्ययः तैरुपात्तफलमेवप्रसूतिर्यस्यसःस्तंबेनकांडेन अवशिष्टः प्रकृत्यादित्वात्तृतीया नीवारइवभासिन्नो
भरसे १५ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थानइति भवानेकनराधिपःसन्सार्वभौमःसन्मरवज्रंयज्ञजन्यंनविद्यतेकिंचनयस्येति अकिंचनस्तस्यभा
वस्तत्त्वंनिर्धनत्वं मयुरव्यंसकादिषुनिपातनात्तत्पुरुषः व्यनक्तिप्रकटयतितत्स्थानेयुक्तं युक्तंहेतोःप्रतस्थानइत्य
मरःतथाहिस्फुरेःपर्यायेणक्रमेणपीतस्यहिमांशोश्चंद्रस्यकलाक्षयःवृद्धेरुपचयात्श्लाघ्यतरोहिवरःखलुअत्र
कामदुकःधर्मार्थक्षीणकोशस्यक्षीणत्वमपिन्नीभवेत्सुरैःपर्यायपीतस्यकृष्णपक्षेविधोरिवेति १६तदिति तत्तस्मा
त्कारणात्नावदनन्यकार्यः यावत्तावत्तुसाकल्येऽवधीयमानेवधारणेइत्यमरःप्रयोजनांतराद्धितएवाहंअन्यत्तोवदा

स्थानेभवानेकनराधिपःसन्नकिंचनत्वंमरवज्रंव्यनक्ति पर्यायपीतस्यसुरैर्हिमांशोःकलाक्षयःश्ला
घ्यतरोहिवृद्धेः १६तदन्यतस्तावदनन्यकार्योगुर्वर्थमाहर्तुमहंयतिष्ये स्वस्त्यस्तुतेनिर्गलितांबुगर्भं
शरद्घनंनार्दतिचातकोपि १७ ७

न्यांतराद्गुर्वर्थंगुरुधनंआहर्तुमर्जयितुंयतिष्येप्रयत्नंकरिष्ये तेतुभ्यंस्वस्तिशुभमस्तुनमःस्वस्तीत्यादिनाचतुर्थी
तथाहिचातकोपिअपिशब्दस्तदेकशरणत्वसूचनार्थःकिंपुनर्विद्यमानोपायइत्यर्थः धरणीपर्यंततोयंचातकानां
रुजाकरमितिहेतोःअन्यत्रैकगतिकोपीत्यर्थः निर्गलितांबुगर्भंनिर्गलितंअंबुयस्मात्तादृशोगर्भोयस्यतंशरद्घ
नंनार्दतिनयाचतेअर्दृगतौयाचनेचेतिधातुःयाचनार्थेरिणर्दनमितियादवः १७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावदिति एतावद्वाक्यमुत्क्रामतियातुंकामोयस्यतंप्रतियातुकामंगंतुकामंतुंकाममनसोरयीतिमकारलोपः म
हर्षेर्वरतंतोः शिष्यंकौत्समृपतिः रघुः निषिध्यनिवार्य हेविद्वन्त्वयागुरवेप्रदेयंवस्तुकिंकिमात्मकंकियत् किंप
रिमाणकंवेत्येवंतंकौत्समन्वयुंक्तपृच्छत् प्रश्नेानुयोगःपृच्छाचेत्यमरः १६ ततइति ततोयथावद्यथार्हंयथा
शास्त्रमित्यर्थः अर्हार्थेवतिविहिताध्वरायविधिवदनुष्ठितयज्ञायसदाचारायेत्यर्थः स्मयावेशविवर्जिताय ग

एतावदुत्क्रामतियातुकामंशिष्यंमहर्षेर्नृपतिर्निषिध्य किंवस्तुविद्वन्गुरवेप्रदेयंत्वयाकियद्वेतितमन्व
युंक्त १६ ततोयथावद्विहिताध्वरायतस्मैस्मयावेशविवर्जिताय वर्णाश्रमाणांगुरवेसवर्णीविचक्षणः
प्रस्तुतमाचचक्षे १९ ७ ७ वीभिनिवेशशून्यायअनुद्धतायेत्यर्थः वर्णिनांब्राह्मणादीनां आश्रमाणां
ब्रह्मचर्यादीनांचगुरवेनियामकायवर्णाःस्युर्ब्राह्मणाद्याइत्यमरः ब्रह्मचारीगृहिवानप्रस्थोभिक्षुश्चतुष्टयं
आश्रमोस्त्रीत्यमरः सर्वकार्यानिर्वाहकायेत्यर्थः तस्मैरघवेविचक्षणः कुशलोविद्वान् वर्णःप्रशस्तिःअशेष
मैथुनाभावः स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं संल्पोध्यवसायश्चक्रियानिर्वृत्तिरेक्षणन्मैथुनमष्टांगं
प्रवदंतिमनीषिणः विपरीतंब्रह्मचर्यमेतदेवाष्टलक्षणं सोस्यास्तीतिवर्णीब्रह्मचारीत्यर्थः वर्णिनोब्रह्मचारिणइ
त्यमरः वर्णात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मचारिणीतिणिनिप्रत्ययः सकोत्सः पस्तुतं प्रकृतंकार्यमाचचक्षेआख्यानवान् १९ समाप्तेति समाप्तविद्येनमयामह
र्षिः गुरुदक्षिणायेदक्षिणास्वीकारार्थं विज्ञापितोभूत् सचगुरुः चिसायासवलितोपचारांतांदुष्करांमेभक्तिमेवपुरस्ता
त्प्रथममगणयत् संख्यातवान् भक्त्येवतुष्टः किंदक्षिणयेत्युक्तवानित्यर्थः अथभक्तिमेवतांदक्षिणांपुरस्तादगण
यदितियोज्यम् २० ७ ७ ७ ७ ७

समाप्तविद्येनमयामहर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायेऽसमचिरायासवलितो
पचारांतांभक्तिमेवागणयत्पुरस्तात् २० निर्बंधसंजातरुषार्थकार्श्यमचिंतं
यित्वागुरुणाहमुक्तः वित्तस्यविद्यापरिसंख्ययामेकोटीश्चतस्रोदशचाहरेति २१
निर्बंधेति निर्बंधेनप्रार्थनातिशयेन संजातरुषाजातक्रोधेन गुरुणाअर्थकार्श्यदारिद्र्यमचिंतयित्वाविचार्यअहं
वित्तस्यधनस्यचतस्रोदशकोटीश्चचतुर्दशकोटीर्मेमह्यमाहरानयेतिविद्यापरिसंख्ययाविद्यासख्यानुसारेणेवो
क्तः अत्रमनुः अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः पुराणंधर्मशास्त्रंचविद्याह्येताश्चतुर्दशेति २१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोहमिति सोहंसपर्याविधिभाजनेनार्घ्यपात्रेणभवंतंप्रभुशब्दएवश्लोषोयस्यतंमत्वानिःस्वंनिश्चयेत्यर्थःश्रुतनि
ष्क्रयस्यविद्यामूल्यस्याल्पतरत्वादितिमद्भावात्संप्रत्युपरोद्धुंनिर्बंद्धुंनाभ्युत्सहे २२ इत्थमिति द्विजराजकांतिः चंद्रकां
तिः चंद्रमसः कांतित्वेनतदर्थापामिवैराग्येवारयति द्विजराजः शशधरोनक्षत्रेशः क्षुपाकरइत्यमरः तस्मा
त्सोमोराजानोब्राह्मणानामितिश्रुतेः एनसोनिवृत्ताइंद्रियवृत्तिर्यस्यसः जगदेकनाथोरघुः वेदविदांवरेणश्रेष्ठे
नद्विजेनकौत्सेनेत्थमावेदितोनिवेदितः सन् एवंकौत्सभूयःपुनर्जगादइत्थमितीदमःस्थमुरितिस्थमुप्रत्ययः २३

सोहंसपर्याविधिभाजनेनमत्वाभवंतंप्रभुशब्दश्लोषं अभ्युत्सहेसंप्रतिनोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य २२
इत्थंद्विजेनद्विजराजकांतिरावेदितोवेदविदांवरेण एनोनिवृत्तेंद्रियवृत्तिरेनंजगादभूयोजगदेकनाथः ७ २३
गुर्वर्थमर्थीश्रुतपारदृश्वारघोःसकाशादनवाप्यकामं गतोवदान्यांतरमित्ययंमेमाभूत्परीवादनवावतारः २४
गुर्वर्थमिति श्रुतस्यपारंदृष्वानूक्तपारदृश्वा दृशेक्तनिविनिक्तनिपूगुरवेगुर्वर्थंगुरुदक्षिणार्थंयथातथा अ
र्थीयाचकः विश्लेषणद्वयेनाप्यस्याप्रत्यारव्येयत्वमाहरघोःसकाशात्कामंमनोरथमनवाप्य वदान्यांतरंदात्रं ७
तरंगतःप्राप्तःस्युर्वदान्यस्थूललक्ष्यदानज्ञोंडाबहुप्रदइत्यमरः इत्येवंरूपस्यपरीवादस्य अपवादस्य अयंन
वःप्रथमोवतारः आविर्भावोमेमाभून्मास्तु परीवादोपवादवदित्यमरः रघोरितिस्वनामग्रहणंसंभावितत्वद्यो
तनार्थं नथाचसंभावितस्यचाकीर्तिर्मरणादतिरिच्यतइति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति सत्वंमहिते पूज्येमद्यास्तेयसिद्धेमदीयेऽग्न्यगारेचेनाग्निशालायांचतुर्थोग्निरिवासन् द्वित्राणिद्वेत्रीणिवा अहानिदिनानि संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येयइतिबहुव्रीहौसंख्येयेजजबहुगणादितिडचूप्रत्ययः समासांतः सोढुमर्हसिहेऽर्हमान्यत्वदर्थंतवप्रयोजनंसाधयितुं यावद्यतेयतिष्ये यावत्पुरानिपातयोर्लडितिभविष्यदर्थेलट् २५

सत्वंमद्यास्तेमहितेमदीयेवसश्चतुर्थोग्निरिवाग्न्यगारे द्वित्राण्यहान्यर्हसिसोढुमहन्यावद्यतेसाधयितुंत्वदर्थम् २५ तथेतितस्यावितथंप्रतीतः प्रत्यग्रहीत्संगरमयजन्मा गामात्तसारांरथुरथ्यवेश्यनिष्क्रष्टुमर्थंचक्रमेकुबेरान् २६

तथेतिअथजन्मा ब्राह्मणःप्रतीतःप्रीतःसन् तस्यरघोरवितथंअमोघंसंगरंप्रतिज्ञां अथप्रतिज्ञाजिसंविदापत्सुसंगरइत्यमरः नांगिरमपिकेचित्पठंति तत्पक्षेवितथामितिस्त्रीलिंगपाठः तथेतिप्रत्यग्रहीत् स्वीचकारयहेर्लुङिईट् रघुरपि गांभूमिमात्तसारांगृहीतधनामवेश्यकुबेरादर्थंधनंनिष्क्रष्टुं आहर्त्तुं चक्रमे इयेष २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसिष्ठेति वसिष्ठस्यमंत्रेणोक्षणंअभिमंत्र्यप्रोक्षणं नज्ज्ञानात्प्रभावात् सामर्थ्याद्धेतोः उदन्वदाकाशमहीधरेषु उदन्वति उदधावाकाशे महीधरेषुच मरुत्सखस्य मरुतःसखेतितत्पुरुषः बहुव्रीहौसमासांताभावात् ततोवायुसहायस्येतिलक्ष्यते वारीणांवाहकोबलाहकः पृषोदरादित्वात्साधुः तस्यमेघस्येव तद्रथस्यगतिः संचारो नविजघ्नेनविहनाहि २७ अथेति अथप्रदोषेरजनीमुखे तत्कालेयानाधिरोहणविधानात् प्रयतोधीरोरघुः समंनाद्भवः सामंतोराजे

वसिष्ठमंत्रोक्षणजात्प्रभावाद्दुन्वदाकाशमहिधरेषु मरुत्सखस्येवबलाहकस्यगतिर्विजघ्नेनहितद्रथस्य २७
अथाधिशिश्येप्रयतःप्रदोषेरथंरघुःकल्पितशस्त्रगर्भम् सामंतसंभावनयैवधीरःकैलासनाथंतरसाजिगीषुः २८
मातःप्रयाणाभिमुखायतस्मैसविस्मयाःकोशगृहेनियुक्ताः हिरण्मयींकोशगृहस्यमध्येवृष्टिंराजांसुःपतितांनभस्तः२९ मात्रमिति संभावनयैव कैलासनाथात्कुबेरं नतुशिवं नरसाबलेनजिगीषुर्जेतुमिच्छुःसन् कल्पितं संज्जितं शस्त्रमायुधं गर्भेयस्यतंरथमधिशिश्ये रथेशायितवानित्यर्थः अधिशीङ्स्थासांकर्मेतिकर्मत्वम् २८ ७
प्रातरिति प्रातःप्रयाणाभिमुखायतस्मैरघवे कोशगृहेनियुक्ताअधिकृताभांडागारिकाः सविस्मयाःसंतः कोशगृहस्य मध्ये नभस्तोनभसः पंचम्यास्तसिलूप्रत्ययः पतितांहिरण्मयीं सुवर्णमयीं दांडिनायनेत्यादिनानिपातनात्साधु वृष्टिं राजांसुः कथयामासुः२९ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमिति भूपतिः रघुः अभियास्यमानादभिगमिष्यमाणान् कुबेरात्लब्धं वज्रेणकुलिशेनभिन्नं वज्रमस्त्रीस्यात्कुलि
शंभिदुरंपविरित्यमरः सुमेरोः पादंप्रत्यंनपर्वतमिवस्थितं पादाःप्रत्यंनपर्वताइत्यमरः शृंगंसुमेरोरितिद्विरूपकोशः
ठः तंभासुरं भास्वरं भंजभासमिदोद्युरमितिद्युरच्प्रत्ययः हेमराशिंसमस्तंरूत्नमेव कोसायदिदेश ददौ नच्च
तंभूपतिर्भासुरहेमराशिंलब्धंकुबेरादभियास्यमानान् दिदेशकोसायसमस्तमेवपादंसुमेरोरिववज्त्राभिन्नं ३०
जनस्यसाकेतनिवासिनस्तोद्वावप्यभूतामभिनद्यसत्वौ गुरुप्रदेयाधिकनिःस्पृहोऽर्थीनृपोर्थिकामादधिकप्रदश्च

तुर्दशकोटिमात्रमित्येवकारार्थः ३० जनस्येति तावर्थिदातारौ द्वावपिसाकेतनिवासिनोऽयोध्यानिवासिनः साकेतं
स्यादयोध्यायांकोसलानंदिनीचसेनियादवः जनस्यस्याभिनंद्यसत्वौसत्यव्यवसायौ अभूतां द्रव्यासत्यव्यवसायेषुसत्व
मस्त्रीतुजंतुषुइत्यमरः द्वौकौ गुरुप्रदेयाद्धिकेऽतिरिक्तद्रव्येनिःस्पृहोऽर्थीत्वतिरिक्तः समधिकोदृढसंधिस्तुसंहननइत्य
मरः अर्थिकामादर्थिनोमनोरथादप्यधिकंप्रददातीतितथोक्तः प्रदाङ्गइतिकप्रत्ययः नृपश्च ३१ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथेति अथप्रीतमनाः मनीषीपंडितः कौत्सः संप्रस्थितेन प्रस्थास्यमानः सन् आशंसायांभूतवच्चेति भविष्यदर्थेक्तः
उष्ट्राणांक्रमेलकानां उष्ट्रेक्रमेलकमयमहांगाइत्यमरः वामीनां वडवानां वामीरुगालीवडवारासभीकरभीषुचेतिविश्वः
शतेवाहिनार्थंप्रापितधनं आननपूर्वकायंविनयनम्रंप्रजेश्वरं रघुं करेणहस्तेनस्पृशन्वाचमुवाच ३२ ७ ७
किमितिवृत्तेस्थितस्यराजशीलेवर्तमानस्य न्यायेनार्जनमर्थस्यवर्द्धनंपालनंतथा सप्तात्रेप्रतिपत्तिश्चराजवृत्तं

अथोष्ट्रवामीशतवाहितार्थंप्रजेश्वरंप्रीतमनामनीषी स्पृशन्करेणाननपूर्वकार्यसंप्रस्थितोवाचमुवाचकौत्सः ३२
किमत्रचित्रंयदिकामसूर्भूर्वृत्तेस्थितस्याधिपतेःप्रजानाम् अचिंतनीयस्तुतवप्रभावोमनीषितंद्योरपियेनदु
ग्धा ३३
हतुर्विधमितिकामंदुकः प्रजानामधिपतेर्नृपस्यभूःकामान्दुनेइतिकामसूः यदियत्सुदुषेत्यादिनाक्विप् अत्रे
कामप्रसवेकिंचित्रं नचित्रमित्यर्थः किंतु तवप्रभावोमहिमाल्वचिंतनीयः कुतःयेनत्वयाद्योरप्यंतरिक्षमपि द्योः
सर्गमंतरिक्षंचेतिविश्वः मनीषिनमभिलषितंदुग्धा दुहेर्द्विकर्मकत्वादप्रधानेकर्मणिक्तः प्रधानकर्मण्यारोप्यये
लादीनाहुर्द्विकर्मकान् अप्रधानेदुहादीनांण्यंतेकर्तुश्चकर्मणइतिस्मरणात् ३३ ७ ७ ७

सर्ग ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशास्यमिति सर्वाणिश्रेयांसिप्रभानि अधिजग्मुषः प्राप्तवतस्तेतवान्यत्पुत्रानिरिक्तमाशास्यमाशीः साध्यंपुनरुक्तभूतं च
सर्वसिद्धमित्यर्थः किंतुईड्यंस्तुत्यंभवंतं त्वांभवतः पितेवआत्मगुणानुरूपं त्वत्तुल्यगुणमित्यर्थः पुत्रंसूनुंलभस्वप्राप्नुहि ३४
इत्थमिति अग्रजन्माब्राह्मणः अग्रजन्माहिजेश्रेष्ठेभ्रातरिब्रह्मणिस्थितइतिविश्वः इत्थमनेनप्रकारेण इदमस्थमुरितिस्थमुः

आशास्यमन्यत्पुनरुक्तभूतंश्रेयांसिसर्वाण्यधिजग्मुषस्ते पुत्रंलभस्वात्मगुणानुरूपंभवंतमीड्यंभ
वनःपितेव ३४ इत्थंप्रयुज्याशिषमग्रजन्माराज्ञेप्रतीयायगुरोःसकाशम् राजापिलेभेरुतमाश्रुत
स्मादालोकमर्कादिवजीवलोकः ३५

राज्ञे रघवे आशिषंप्रयुज्य गुरोः वरततोःसकाशंसमीपं प्रतीयाय प्राप राजापिजीवलोकः प्राणिसमूहः जीवः प्राणि
निगीष्यतावितिविश्वः अर्कात् सूर्यादालोकं प्रकाशमिव चैतन्यमितिपाठेज्ञानमिव तस्माद्दृष्टेः आश्रुशीघ्रंसुतंलभेप्राप
३५ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मइति तस्यरघोर्देवीमहिषी ब्रह्मन्नस्येदमित्यणूप्रत्ययः ब्रह्मदेवतकेऽभिजिन्नामकेमुहूर्त्तेकिल ईषदसमाप्तंकुमारंकुमार
कल्पं स्कंदसदृशंदृषदसमाप्तावित्यादिनाकल्पप्रत्ययः कुमारंपुत्रंसुषुवे कुमारोबालकेस्कंददृतिविश्वः अतोब्राह्ममुहूर्त्तोत्प
न्नत्वात्पितारघुः ब्रह्मणोविधेरेवनाम्ना आख्यायातमात्मजन्मानंपुत्रंअजनामकंचकार अजोहरौहरौकामेविधौछागेरघोः
सुनेटृतिविश्वः ३६ रूपमिति ओजस्वितेजस्वि ओजस्तेजसिधातूनामवर्णप्रकारयोःओजोबलेचदीप्तौचेतिविश्वः ३७

ब्राह्मेमुहूर्तेकिलतस्यदेवीकुमारकल्पंसुषुवेकुमारं अतःपिताब्रह्मणएवनाम्नातमात्मजन्मानम
जंचकार ३६ रूपंतदोजस्वितदेववीर्यंतदेवनैसर्गिकमुन्नतत्वम् नकारणात्स्वाद्विभिदेकुमारः
प्रवर्तितोदीपइवप्रदीपात् ३७

रूपंवपुःअथरूपंनपुंसकम् स्वभावाकृतिसौंदर्यवपुः षुश्लोकऊढ्योरितिविश्वकेशवोतदेवैपैतृकमेव वीर्यंशौर्यंतदेवनै
सर्गिकंस्वाभाविकमुन्नतत्वंतदेव तादृगेवेत्यर्थःकुमारोबालकःप्रवर्तितउत्पादितोदीपः प्रदीपात्स्वोत्पादकदीपादिव स्वा
त्मकीयात् पूर्वादिग्योनवभ्योवेतिसमाद्वावोवैकल्पिकः कारणात् जनकात् नविभिदे भिन्नोनाभूत् सर्वात्मनापितृतु
ल्यएवाभूदित्यर्थः ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपात्तविद्यमिति गुरुभ्योविधिवद्यथाशास्त्रमुपात्तविद्यं लब्धविद्यं यौवनस्योद्भेदादाविर्भावाद्धेतोः विशेषेण कांतंसौम्यं तमजं गो
तुकामासाभिलाषापिश्रीः राज्यलक्ष्मीः धीरोस्थिरोन्नतचित्ता स्थिराचित्तोन्नतिर्यातुनद्वैर्यमितिसंज्ञिनमिति भूपालः कन्यापि
तुरिव गुरोरघोरनुज्ञामाचकांक्षेयेष यौवराज्यार्होभूदित्यर्थः अनुज्ञाराज्ञानृपितृपारतंत्र्यमुपमासामर्थ्यात्पाणिग्रहणयोग्य

उपात्तविद्यंविधिवद्गुरुभ्यस्तंयौवनोद्भेदविशेषकांतं श्रीर्गंतुकामापिगुरोरनुज्ञांधीरेवकन्यापितु
राचकांक्ष ३९ अथैरवरेणक्रथकैशिकानांस्वयंवरार्थंस्वसुरिंदुमत्याः आप्तःकुमारानयनो
त्सुकेनभोजेनदूतोरघवेविसृष्टः ३९ ७

ताचध्वन्यते ३९ अथेति अथरवसुर्भगिन्याइंदुमत्याः स्वयंवरार्थंकुमारस्याजस्य आनयनेउत्सुकेन क्रथकैशिकानांवि
दर्भदेशानामीश्वरेणस्वामिनाभोजनराज्ञा आप्तोहितोदूतःरघवे विसृष्टःप्रेषितः क्रियामात्रयोगेपिचतुर्थी आप्तग्रहण
मत्रैवप्रामर्थ्यमितिद्योतनार्थम् ३९ ७ ७ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमिति असौरघुः तंभोजंश्लाघ्यसंबंधं अनूचानत्वादिगुणयोगात्स्पृहणीयसंबंधंविचिंत्यविचार्य पुत्रंच दारक्रियायोग्यदशंविवाहयोग्यवयसंविचिंत्य ससैन्यमेनंपुत्रंकृत्वा समृद्धांविदर्भाधिपस्यभोजस्यराजधानींपुरींप्रति प्रस्थाप यामाससंप्रेषयामास धीयंतेऽस्यामितिधानी करणाधिकरणयोश्चेत्यधिकरणार्थेल्युट्प्रत्ययः सहांधानीनिवि ग्रहः ४० तस्येति उपकार्यासु राज्ययोग्येषुपदभवनादिषु सौधोस्त्रीराजसदनमुपकार्योपकारिकेत्यमरः वचन७

तंश्लाघ्यसंबंधमसौविचिंत्यदारक्रियायोग्यदशंचपुत्रम् प्रस्थापयामाससससैन्यमेनमृद्धांविदर्भाधि पराजधानीम् ४० तस्योपकार्यारचितोपचारावन्येतराजानपदोऽपदाभिः मार्गेनिवासामनुजेंद्रसूनोर्बभूवुरुद्यानविहारकल्पाः ४१ ७ ७ ७ ७ ७ ७ ७

व्याख्यानेक्षीरस्वामी उपक्रियतेऽउपकरोतिचपदमंऽपादिराजसमूनमिति रचिताऽउपचाराः शयनोदयोपेषुतेतथो स्काः जानपदानांजनपदेभ्यआगतानामुपदाभिरुपायैर्नैर्वन्याः वनेभवाः इतरेयेषांतेवन्येतराः अन्याइत्यर्थः नब हुव्रीहाविनिसर्वनामसंज्ञाप्रतिषेधः तत्पुरुषेसर्वनामसंज्ञादुर्वारैव तस्यमनुजेंद्रसूनोरजस्यमार्गेनिवासावसतिका उद्यानान्याक्रीडाः पुमानाक्रीडउद्यानमित्यमरः नान्येचविहारविहारस्थानानितत्कल्पाः तत्सदृशाइत्यर्थः ईषदसमा सावित्यादिनाकल्यप्प्रत्ययः वसुधुः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सङ्गति विलंघिताध्वा अतिक्रांतमार्गः सोऽजः सीकरार्द्रैः सीतलैरित्यर्थः मरुद्भिर्वातैरानर्तिताः कंपितानक्तमालाः चिरि
बिल्वाख्यवृक्षभेदाः यस्मिन्तत् निवेशार्हइत्यर्थः चिरिबिल्वानक्तमालः करजश्चकरंजकइत्यमरः नर्मदायारोधसिरेवास्मी
रे क्लांतश्रांत रजोभिः धूसराः केतवो ध्वजायस्य तत्सैन्यंनिवेशयामास रेवातुनर्मदासोमाद्भवामेकलकन्यकेत्यमरः ४२
अथेति अधोपरिष्टादूर्ध्वं उपर्युपरिष्टादितिनिपातः भ्रमद्भिः मदलोभादितिभावः भ्रमरैः प्रागुन्मज्जनार्द्रपूर्वसूचितोज्ञा

सनर्मदारोधसिधसीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेशायामासविलंघिताध्वाक्लांतरजोधूसरके
तुसैन्यम् ४२ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितांतःसलिलप्रवेशः निर्धौतदानामलगंड
भित्तिर्वन्यःसरित्तोगजउन्ममज्ज ४३ ७

पितोंऽतःसलिलप्रवेशोयस्यसतथोक्तः निर्धौतदानेक्षात्स्निग्धमदे अतएवामलेगंडभित्तीयस्यसतथोक्तः दानंगजमदेत्याग
दूतिशाश्वतः निर्धौतदानेचतज्जमलगंडभित्तीच मशस्तो गंडो गंडभित्तीयशांसावचनश्चेतिसमासः भित्ति शब्दः प्रशस्तार्थः त
थागणरत्नमहोदधौ मनःशिलिकोद्गमिश्राः स्युः प्रकांडस्थलभित्तयइतिभितिः प्रदेशोवा भित्तिः कुड्येप्रदेशेपीतिविश्वः निर्धौत
दानेनामलेगंडभित्ती यस्येतिवा वन्योगजः सरित्तो नर्मदायाः सकाशात्पंचम्यास्तस्तिल उन्ममज्जोत्थितः ४३ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युग्मम् निःशेषेति कथंभूतोगजः निःशेषंयथातथाविक्षालितधातुनापि धौतैरेरिकादिनापि ज्ञापकभूतेधातोक्षालितेपि ज्ञापकत्वंयुक्तं नीलाभिरूर्ध्वाभिरेवाभिस्तदाभिघातजनिताभिः शबलेनकर्बुरेण चित्रंकिर्मीरकल्माष शबलेनाश्वकर्बुरइत्यमरः अश्मभिः पाषाणैः विकुंठितेन कुंठीकृतेन दंतद्वयेन कक्षवान्नामतत्रत्यः कश्चनपर्वतस्तस्य तटेषु पर्यक्रि

युग्मं निःशेषविक्षालितधातुनापिवप्रक्रियामृक्षवतस्तटेषु नीलोर्ध्वरेखाशबलेनशंसनूदंतद्वयेना
नाश्मविकुंठितेन ४४ संहारविक्षेपलघुक्रियेणहस्तेननीराभिमुखःसशब्दम् बभौसभिंदन्बृ
हतस्तरंगान्वार्यर्गलाभंगइवप्रवृत्तः ४५

पांवप्रक्रीडांउत्खातकेलिमित्यर्थः उत्खातकेलिशृंगाद्यैर्वप्रक्रीडानिगद्यतइति शब्दार्णवः शंसनू कथयन् सूचयन्नित्यर्थः
४४ संहारेति संहारविक्षेपयोः संकोचनप्रसारणयोर्लघुक्रियेणक्षिप्रव्यापारेण लघुक्षिप्रमरद्रुतमित्यमरः हस्तेनशुंडादं
डेन हस्तोनक्षत्रभेदेस्यात्करेभकरयोरपीतिविश्वः सशब्दंसघोषंयथातथा बृहतस्तरंगान्भिंदन्विदारयन् नीराभिमुखः
सगजः वारिगजबंधनस्थानं वारीतुगजबधंनीत्यमरयादवो वार्या अर्गलायाविघ्नेभस्यस्तंभस्यभंगेभंजनेप्रवृत्तइवबभौ वारिज
लमेवार्गलातस्याभंगइतिवा ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शैलेति शैलोपमः सगजः शैवलमञ्जरीणांजालानिवृंदानि तरसारहसाकर्षन् पश्चात्तटमुत्ससर्प प्राप पूर्वंतेनगजेनोत्पीडितो नुन्नो वारिराशिर्यस्यसः सरित्प्रवाहस्तटमुत्ससर्प उर्ध्वंप्राप ४६ तस्येति तस्यैकनागस्यैकाकिनोगजस्य अत्रैकशब्दः संख्यार्थो न एकेमुख्यान्यकेवलाइत्यमरः शाश्वतीकपोलभित्योर्गंडप्रदेशयोः जलावगाहेन जलस्नानेनक्षणमात्रं शांतानिवृत्ता मदद्रुर्दिश्री र्मदवर्षलक्ष्मीः दुर्दिनश्रीर्लक्षणयावर्षमुच्यते वन्येतरानाग्राम्याणामनेकपानागजानादर्शनेनपुनर्दिदीपेववृधे ४७ सप्तच्छदेति

शैलोपमः शैवलमंजरीणांजालानिकर्षंस्तरसासपश्चात् पूर्वंदतुत्पीडितवारिराशिः सरित्प्रवाहस्तट
मुत्ससर्प ४६ तस्यैकनागस्यकपोलभित्योर्जलावगाहक्षणमात्रशांता वन्येतरानेकपदर्शनेनपु
नर्दिदीपेमददुर्दिनश्रीः ४७ सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्रायमदंतदीयम् विलंघिताधोरणतीव्र
यत्नाः सेनागजेंद्राविमुखाबभूवुः ४८ ७

सप्त छदाःपर्णानि यस्येति वृक्षभेदः सप्तपर्णोविशालत्वकूशारदोविषमच्छदइत्यमरः सप्तच्छदस्य क्षीरवत् कटुः सुरभिः प्रवाह
प्रासारोयस्यतं कटुतीक्ष्णेसुगंधेस्यादितिविश्वः कटुतिक्तकषायास्तुसोरभ्येपिप्र कीर्तिनादुतियादवः असह्यंतदीयंमदमाघ्राय से
नागजेंद्राः विलंघितस्तिरस्कृत आधोरणानां हस्तिपकानांतीव्रोमहान्यत्नोयैस्तेतथोक्ताः संतः विमुखाः पराङ्मुखाः बभूवुःआ
धोरणाहस्तिपका अश्वारोहास्तुसादिनइत्यमरः ४८ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति सः गजः बंध्यंतेयेरिनिबंधाः रज्वादयः छिन्नाबधोयेस्तेछिन्नबंधाः अनएवद्रुताः पलायिताः युगंवहंतीतियुग्या
वाहाः यस्मिन्नूसः सचासौशून्यश्चतं भग्नाअक्षा रथावयवादारुविशेषाः अक्षो रथस्यावयवेपाशकेचाक्षमिंद्रिय
मितिकेचाहुः येषांतेभग्नाक्षाअतएवपर्यस्ताः पतिताः रथायस्मिन्नूतं रामाणांस्त्रीणांपरित्राणेरक्षणेविहस्ताव्याकु
लायोधायस्मिन्नूतंविहस्तव्याकुलोसमाविद्यमरः सेनानिवेशंशिबिरं निवेशः शिबिरोद्वाहनिवासेषुप्रकीर्तितइतिको

सच्छिन्नबंधद्रुतयुग्यशून्यंभग्नाक्षपर्यस्तरथंक्षणेन रामापरित्राणविहस्तयोधंसेनानिवेशंतुमुलंच
कार ४९ तमापतंतंनृपतेरवध्योवन्यः करीतिश्रुतवान्कुमारः निवर्तयिष्यन्नविशिरेवनकुंभेजघा
ननात्यायतकृष्टचापः ५०

शःक्षणेनक्षण्णमात्रंतुमुलंसंकुलंचकार ४९ तमिति नृपतेः राज्ञोवन्यःकरी अवध्यइतिश्रुतवान् शास्त्रात्ज्ञान
वान् कुमारोऽजआपतंतमभिधावंतं तंगजं निवर्तयिष्यन्नतुप्रहरिष्यन्नतएवनात्यायतमनतिदीर्घं नञर्थस्यनश
ब्दस्यसुसुपेतिसमासः कृष्टचापः आकृष्टशार्ङ्गः सन्नविशिरेवेनबाणेन कुंभेकुंभस्थले जघान अत्रचाक्षुषःलक्ष्मी
कामोयुद्धादन्यत्रकरिवधंनकुर्यादियंहिश्रीर्यैकरिणइतिअतएवयुद्धादन्यत्रद्योतनार्थमेववन्यग्रहणंकृतमिति ५०

सर्ग० ५

१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्रुनि सगजोविद्धएवविद्धमात्रस्ताडितमात्रः किल ननुप्रहृतः तथापि नागरुपंगजशरमुत्सृज्य तेनवृत्तांतेनविस्मितैः
सैन्यैः दृष्टःसन्नस्फुरतःप्रभामंडलस्य मध्यवर्तिकांतंमनोहरं व्योमचरंवपुःप्रपेदे प्राप ५१ अथेति अथप्रभावोप
नतैः प्रौढैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमारमज्जमव कीर्याभिवृष्य दशनप्रभाभिः दंतकांतिभिः संव

सविद्धमात्रः किलनागरूपमुत्सृज्यतद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्यवर्तिकांतंवपुर्व्योमचरंप्रपेदे ५१
अथप्रभावोपनतैःकुमारंकल्पद्रुमोत्थैरवकीर्यपुष्पैः उवाचवाग्मीदशनप्रभाभिःसंवर्द्धितोरःस्थलतारहारः ५२

र्द्धिताउरःस्थलेयेतारहाराः स्थूलमुक्ताहारा स्तेयेनसतथोक्तः तारोमुक्तादिसंशुद्धोतरलेरुद्गमोक्तिकइतिविश्वः
वाचोऽस्यसंतिवाग्मीवक्ता वाचोग्मिनिरितिग्मिनिप्रत्ययः सपुरुषउवाच ५२. ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतंगशापादिति अवलेपमूलाद्गर्वहेतुकात् अवलेपस्तुगर्वस्यालेपनेदूषणेपिचेतिविश्वः मतंगजस्यमुनेः शापात्तुमतं
गजत्वमवाप्तवान् शप्तवानस्मि मांप्रियदर्शनस्य प्रियदर्शनाख्यस्य गंधर्वपतेः गंधर्वराजस्य तनूजंसुतंस्त्रियांमूर्तिस्त
नुस्तनूरित्यमरः नन्वादेर्वेति केचिदित्यूङ् प्रियंवदंप्रियंवदाख्यमंवेहिजानीहि प्रियंवदतीतिप्रियंवदः प्रियवशेवदःख

मतंगशापादवलेपमूलादवाप्तवानस्मिमतंगजत्वम् अवेहिगंधर्वपतेस्तनूजंप्रियंवदंमांप्रियदर्श
नस्य ५३ सचानुनीतः प्रणतेनपश्चान्मयामहर्षिर्मृदुतामगच्छत् उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्य
हियत्साप्रकृतिर्जलस्य ५४

जितिखच्चूपत्ययः ५३ सइति समहर्षिश्चप्रणतेनमया अनुनीतः सन्प्रार्थितः सन्पश्चान्मृदुतांशांतिंमगच्छत् तथा
हि जलस्योष्णत्वमग्नेरातपस्यसंप्रयोगात्संपर्कात् नतुप्रकृत्योष्णत्वं यच्छैत्यंसाप्रकृतिः स्वभावः विधेयप्राधान्यात्सेति
स्त्रीलिंगनिर्देशः महर्षिणामपि शांतिरेव स्वभावो न क्रोधदुतिभावः ५४ ७ ७ ७ ७ १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इक्ष्वाकिनि इक्ष्वाकुवंशः प्रभवोयस्यसोऽजः यदातेकुंभमयोमुरवेनलोहाग्रेण शरेणभेत्स्यतिविदारयिष्यति तदारवेन
स्वकीयेन वपुर्महिम्नापुनः संयोक्ष्यसेसंगमिष्यसइतिसतपोनिधिर्मामवोचत् ५५ संमोचितइति चिरंप्रार्थितदर्शनं

इक्ष्वाकुवंशप्रभवोयदातेभेत्स्यत्यजःकुंभमयोमुरेवन संयोक्ष्यसेस्वेनवपुर्महिम्नातदेत्यवोचत्सतपो
निधिर्माम् ५५ संमोचितःसत्ववतात्वयाहंशापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियंचेद्भवतोनकुर्यांवृथा
हिमेस्यात्स्वपदोपलब्धिः ५६ ७

यस्यतेनसत्ववताबलवत्तात्वयाःहंशापात्संमोचितोमोक्षंप्रापितः भवतस्तवप्रतिप्रियंप्रत्युपकारंनकुर्यांचेन्मेस्व
पदोपलब्धिःस्वस्थानप्राप्तिःपदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः वृथास्यात् तदुक्तं प्रतिकर्तुमशक्तस्यजी
वितान्मरणंवरमिति ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संमोहनमिति हेसरवे सखिशब्देनसमभाणनोक्ता तथोक्तं अत्यागःसहनोबंधुःसदेवानुमतःसुहृत् एकक्रि
यंभवेन्मित्रंसमभाणःसखामतद्भूतिप्रयोगसंहारयोःप्रक्षेपसंकोचयोःविभक्तमंत्रं गांधर्वं गंधर्वदेवताकंसं
मोह्यतेनेनेतिसंमोहनंनाममममास्त्रं आधत्स्वगृहाण यातोस्मात्प्रयोक्तुरस्त्रप्रयोगिणोःरिहिंसाविजय श्चबहस्ते

संमोहनंनामसखेममास्त्रंप्रयोगसंहारविभक्तमंत्रं गांधर्वमाधत्स्वयतःप्रयोक्तुर्नचारिहिंसाविजयश्चह
स्ते ५७ अलद्धियामांप्रतियन्मुहूर्त्तंदयापरोभूःप्रहरन्नपिक्षम् तस्मादुपच्छंदयतिप्रयोज्यंमयित्वयानप्र
तिषेधरोक्ष्यं ५८ ७

हस्तगतोविजयोभवतीत्यर्थः ५७ वधलज्जितःकथमस्त्रंगृहणपरःस्यामितिचेत्तत्राह अलमिति किंच मांप्र
तिहियाप्रहारनिमित्तयालं कुतोयतोद्यहेतोस्त्वंमांप्रहरन्नपिमुहूर्तमल्पकालं घटिकाद्वयंवामुहूर्तमल्पकालेस्याद्व
टिकाद्वितयेपिचेतिज्ञात्वार्णवःदयापरःकृपालुरभूःतस्मादुपच्छंदयतिमार्थ्यमानेमयित्वयाप्रतिषेधःपरिहारःस
एवरोक्ष्यंपारुष्यंतन्नप्रयोज्यंनकर्तव्यं ५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथेति नासोमः चंद्रइवनृसोमः सोमओषधिचंद्रयोरितिशाश्वतः पुरुषश्रेष्ठइत्यर्थः उपमितसमासः अस्यविदस्व
ज्ञः सोऽजस्तथेति सोमउद्भवोयस्यास्तस्याः सोमोद्भवायाःसरितोनर्मदायाः रेवातुनर्मदासोमोद्भवामेकलकन्यकेत्यमरः
पवित्रंपयः उपस्पृश्यपीत्वा आचम्येत्यर्थःउदङ्मुखः सन्निवर्तितशापात् उपकृतादित्यर्थः तस्मात्प्रियंवदादस्यमंत्रंजया

तथेत्युपस्पृश्यपयःपवित्रंसोमोद्भवायाःसरितोनृसोमः उदङ्मुखःसोऽस्यविदस्यमंत्रंजयाहृतस्मान्निगृ
हीतशापात् ५९ एवंतयोरध्वनिदैवयोगादासेदुषोःसरय्यमचित्यहेतु एकोययौचैत्ररथप्रदेशान्सौरा
ज्यरम्यानपरोविदर्भान् ६०
ह ५९ एवमिति एवमध्वनिमार्गेदैवयोगोदैववशादचिंत्यहेतु अनिर्धार्यहेतुकंसरय्यंसरित्वं सरव्ययतियत्प्रत्ययः आ
सेदुषोः प्राप्तवतोस्तयोर्मध्यएकोगंधर्वः चैत्ररथस्यकुबेरोद्यानस्यप्रदेशान् अरयोद्यानंचैत्ररथंपुत्रस्तुनलकूबरइत्यम
रः अपरोऽजःसौराज्येनराजन्वत्तपारम्यान्विदर्भान्देशान् ययौ ६० ५ ५ ५ गोविद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमिति नगरस्योपकंठेसमीपेतस्थिवांसंस्थितं तमजं तस्याजस्यागमेनागमनेनारूढउसन्नोगुरुःप्रहर्षोयस्यसः कथंकेशि

केंद्रोविदर्भराजः प्रवृद्धोर्मिःऊर्मिमालीसमुद्रः मलमल्लुधारणेइतिधातोर्वृद्धादित्वान्डुनिप्रत्ययः चंद्रमिवप्रत्युज्जगाम ए

प्रवेश्येति एनमजमग्रयायी सेवाधर्मेणपुरोगच्छन्नित्यर्थः नीचैर्नम्रः पुरंप्रवेश्यप्रवेशंकारयित्वा अर्पितश्रीः तथाते

तंतस्थिवांसंनगरोपकंठेतदागमारूढगुरुप्रहर्षः प्रत्युज्जगामक्रथैकेशिकेंद्रश्चंद्रंप्रवृद्धोर्मिरिवोर्मिमा

ली ६१ प्रवेश्यचैनंपुरमग्रयायीनीचैस्तथोपाचरदर्पितश्रीः मेनेयथानत्रजनःसमेतोविदर्भमागंतुमजं

गृहेशम् ६२

नयकारेणोपाचरच्च उपचरीतवान् यथायेनप्रकारेण तत्रपुरेसमेतोमिलितोजनोविदर्भभोजं आगंतुं अतिथिंमेने

अजंगृहेशं गृहपतिंमेने स्युरावसिकआगंतुरतिथिर्नागृहागतइत्यमरः ६२ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्येति रघुप्रतिनिधिः रघुकल्पः रघुतुल्यइत्यर्थः उत्तुंचदंडिनासादृश्यवाचकप्रस्तावे कल्पदेशीयदेश्यादिप्रत्यय प्रतिनि
धीअपीति सोऽजः प्रणतेर्नमस्कृतवद्भिः कर्तरिक्तः तस्यभोजस्याधिकारोनियोगस्तस्यपुरुषैः अधिकृतैरित्यर्थः प्रदिष्टं नि
र्दिष्टं प्राग्द्वारस्यवेद्यांविनिवेशिताः प्रतिष्ठापिताः पूर्णकुंभाँयस्यास्तां स्थापितमंगलकलशामित्यर्थः रम्यांरमणीयां नवो

तस्याधिकारपुरुषैः प्रणतेः प्रदिष्टांप्राग्द्वारवेदिविनिवेशित
पुर्णकुंभाम् रम्यांरघुप्रतिनिधिःसनवोपकार्यांबाल्यात्परा
मिवदशांमदनोध्युवास ६३ ७ ७ ७ ७

पकार्यां नूतनराजभवनं उपकार्यांराजसद्मन्युपचारचितेन्यवदितिविश्वः मदनोबाल्यात् परांशैशवादनंतरांदशांयोव
त नमिवेत्यर्थः अध्युवासाधिष्ठितवान् तत्रोपिवाभनित्यर्थः उपान्वध्याङ्वसइतिकर्मत्वंवसंततिलकावृत्तं वसंततिलकान्
भोजोगोइतिलक्षणात् ६३ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रेति तत्रोपकार्यायांस्वयंवरनिमित्तंसमाहृतःसंमीलितोराजलोकोयेननतू कमनीयंस्पृहणीयं कन्यालक्षणं क
न्यासुश्रेष्ठं लक्षणस्त्रीलक्षणमपिप्रभातेपुरुषेध्वजे श्रेष्ठभूषापुंजशृंगपुच्छचिन्हाश्वलिंगिषितियादवः लिप्सोर्लक्षु
मिच्छोः लभेःसन्नंतादुप्रत्ययः अजस्यभावावबोधेपुरुषस्याभिप्रायपरिज्ञाने कलुषासमर्थादयितेवरात्रौनिद्राचिरेणन
यनाभिमुखीबभूवराज्ञानंकामिनंचोरमाविशंतिप्रजागराइतिभावः अभिमुखीभ्रद्धोऽभिबंतश्च्यंनोवा ६४ तमिनि कर्ण
तत्रस्वयंवरसमाहृतराजलोकंकन्यालक्षणकमनीयमजस्यलिप्सोः भावावबोधकलुषादयितेवरात्रौ
निद्राचिरेणनयनाभिमुखीबभूव ६४ तंकर्णभूषणनिपीडितपीवरांसशय्योत्तरच्छदविमर्दकृशांगरागम्
सूतात्मजाःसवयसःप्रथितप्रबोधंप्रबोधयन्लुषस्त्रिवाग्भिरुदारवाचः ६५

भूषणाभ्यांनिपीडितौपीवरौपीनौ अंसौभुजौयस्यसः तंशय्यायाउत्तरच्छदस्योपर्यास्तरणवस्त्रस्यविमर्देनसंघर्षेणकृशोविर
लोंऽगरागोयस्यतं नत्वंगनासंगादिनिभावः प्रथितप्रबोधं प्रकृष्टज्ञानवंतंतमजं सवयसः समानवयस्काः उदारवाचः प्रग
ल्भगिरः सूतात्मजाः वंदिपुत्राः वाग्भिः स्तुतिपाठैः उषसिप्रातःकाले प्रबोधयन्बोधयामासुः वैतालिकाललितबंधम-
नोहराभिरितिपाठे वैतालिकाबोधकराः ललितबंधेनमन्नोहराभिर्वाग्भिरितिसंबंधः ६५ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्रिरिति हेमनिमतांबुद्धिमतांवरश्रेष्टनिर्धारणेषष्ठी रात्रिर्गता शय्यांनत्यंमुच विनिद्रोभवेत्यर्थः विनिद्रत्वफलमाह धात्रात्र
ह्मणा जगतोधूर्भारः धूःस्याद्यानमुरेवभारइतियादवः द्विधैव द्वयोरेवेत्यर्थः एवकारस्तृतीयनिषेधार्थः विभक्तानतुविभज्य

रात्रिर्गतामतिमतांवरमुंचशय्यांधात्रादिधैवननधूर्जगतोविभक्ता यामेकतस्तवबिभर्तिगुरुर्विनिद्र
स्तस्याभवानुपरधुर्यपदावलंबी ६६ निद्रावशेनभवेताप्यनवेक्ष्यमाणापर्युत्सुकत्वमबलानिशिरं
डितेव लक्ष्मीर्विनोदयतियेनदिगंतलंबीसोपिलदाननरुचिंविजहातिचंद्रः ६७

स्थापिनास्वलु नतःकिमतआहयांधुरमेकत एवकोटौनवगुरुःपिनाविनिद्रःसन्विभर्ति तस्याधुरोभवानूधुरंवहनीतिधु
र्योभारवाहितस्यपदंवहनस्थानं अपरंयद्दुर्यपदं नदवलंबी अस्तीतिद्वेषः अतोविनिद्रोभवेत्यर्थः नह्युभयवाह्यमेकोवह
नीतिभावः ६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रारविंदराजवदनादयोलक्ष्मीनिवासस्थानानितिप्रसिद्धिमाश्रित्योच्यते निद्रावशेनेतिनिद्रावशेननिद्राधीनेन रम्यंतरासंगोत्रध्व
नेश्चनापर्युत्सुकत्वमपि त्वय्यनुरक्तत्वमपीत्यर्थः प्रसितोत्सुकाभ्यांतृतीयाचेनिसप्तम्यर्थेतृतीयाअपिराद्धस्यदृषयानुरागस्यानुपेक्ष
त्वद्योतनार्थः निशिरंडितामर्तुरन्यासंगज्ञानकलुषिताअवलेवनायिकेवज्ञानेऽन्यासंगविक्लेदंडितेर्ष्याकषायितेतिदशरूपकेलक्ष
णात् अनवेक्षमाणाअविचारयंतीसतीउपेक्षमाणेत्यर्थः लक्ष्मीर्यनचंद्रेणसहत्वदाननसदृशत्वादितिभावः विनोदयतिविनादकरोति
विनोदशब्दान्नक्रोतिःनदात्वष्टृतिणिचुसादृश्यदर्शनादयोहिविरहिणांविनोदस्थानानिभवंतीतिभावः चंद्रोपिदिगंतलंबीपश्चिमाशांग
नःसन् अस्तंगच्छन्नित्यर्थः अनएवत्वदाननरुचिंविजहातित्वन्मुखसादृश्यंत्यजतीत्यर्थः अतोनिद्राविहायनोलक्ष्मीमनन्यशरणांप
रिगृह्णात्यर्थः अथवानिद्रावशेनभवताअनवेक्ष्यमाणाअनिरिक्ष्यमाणा कर्मणिज्ञानिचुमत्ययः लक्ष्मीः प्रयोजककर्तायेनचंद्रेणप्रयोज्ये
नपर्युत्सुकत्वंत्वद्विरहवेदनाकालाक्षमत्वमोत्सुक्यंमनस्तापज्वरादिकमित्यलंकारविनोदयतीतिनिरासयतीतियोजना शेषपूर्ववत् मल्ली

नद्वल्गुनायुगपदुन्मिषितेननावत्सद्यःपरस्परतुलामधिरोहतांदे प्रस्पंदमानपरुषेतरतारमंतश्चक्षुस्तवप्रचलि
तभ्रमरंचपद्मं ६६ वृंताच्छ्लथंहरतिपुष्पमनोकहानांसंसृज्यतेसरसिजैरुणांशुभिन्नैः स्वाभाविकंपरगुणेन
विभातवायुःसौरभ्यमीप्सुरिवतेमुखमारुतस्य ६९ ७ ७ ७ ७ ७

नाथस्तु अर्थोपपत्तिमुपश्लेषन्निमंपक्षमुपेक्षिष्ट ६७ सदिति तत्तस्मात्लक्ष्मीपरिग्रहकारणात् वल्गुनामनोज्ञेन वस्तुस्थानेमनोज्ञेन
वस्तुभाषितमन्यवनितेदिविश्वः युगपत्नावदुन्मिषितेन युगपदेवोन्मीलनेन सद्यो हेअपिपरस्परतुलामन्योन्यसादृश्यमधिरो
हतांप्राप्नुवतांम् प्रार्थनायांलोट् हेकेअंतः प्रस्पंदमानाचलंतीपरुषेतरास्निग्धातारकनीनिकायस्यतत्तथोक्तं तारकाक्ष्यःक
नीनिकेत्यमरः तवचक्षुः अंतः प्राचलितभ्रमरंचलद्वृंतं पद्मंचयुरापदुन्मिषितेसति संपूर्णसादृश्यलाभइतिभावः ६६ ७
वृंतादिति विभातवायुः प्रभातवायुः स्वाभाविकेनैसर्गिके तेनवमुखमारुतस्यनिःश्वासपवनस्य सौरभ्यं तादृक्सौगंध्यमितिभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वःपरगुणेनान्यदियगुणेन सांकामिकगधनेत्यर्थःईक्षरसनुमिच्छुरिव आपज्ञप्यूधामीदिनिइकारादेशःअनोकहानांवृक्षाणां
स्रथंशिथिलंपुष्पंवृंतास्रसबंधनात् वृंतंयस्रबंधनमित्यमरःहरत्यादत्ते अरुणांशुभिन्नैस्तरुणिकिरणोद्बोधिनैःसरसिजानैः
सरसिजैःकमलैः सहनत्युरुषेकृति बहुलमितिस्रतस्या अलुक संसृज्येतसंगच्छतेसृजेर्दैवादिकात् कर्तरिलिट् ६९
नाम्रेति नाम्रोदरेषुरुणाभ्यंतरेषुद्रुमपल्लवेषु निर्धौतयाहारगुलिकाःमुक्तामणयस्तद्वद्दिशदंनिर्मलंहिमांभःलब्धपरभा
गतया लब्धोत्कर्षतया परभागेगुणोत्कर्षइतियादवः अधरोष्ठत्वदीयंसदशनार्चिर्दंतकांतिसहितं लीलास्मितमिवाभाति
शोभते ७० ७ ७ ७ ७ ७ ७ ७

नाम्रोदरेषुपतिनंद्रुमपल्लवेषुनिर्द्धौतहारगुलिगुलिकाविश्रदंहिमांभः आभातिलब्धयरभारा
तयाधरोष्टलीलास्मितंसदशनार्चिरिवत्वदीयं ७० यावत्स्रतापनिधिराक्रमतेनभानुरन्हायताव
दरुणेननमोनिरस्तम् आयोधनायत्रसरतांत्वयिवीरयातेकिंवारिपूंस्तवगुरुःस्वयमुच्छिनत्ति७१

यावदिति प्रतापनिधिस्तेजोनिधिर्भानुर्यावन्नाक्रमतेनोद्गच्छति आङ्उद्गमनेइत्यात्मनेपदंतावद्भानावनुदितएवेत्यर्थःअन्हाय स्म
रिनिद्राकृच्छ्रादित्यंजसान्हायेत्यमरःअरुणेनानूरुणासूरसूतोरुणोनूरुरित्यमरः नमोनिरस्तं नथाहि हेवीर त्वयि आयोधने
युयुत्सेषुयुद्धमायोधनंजन्यमित्यमरः अग्रसरतांपुरःसरतांगतेसति तवगुरुःपितारिपून् स्वयंउच्छिनत्तिकिंवा नोच्छिनत्ते
वेत्यर्थः नरवलुयोग्यन्यस्तभाराणांस्वामीनांस्वयंव्यापाररवेदनुमितभावः७१ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शय्यामिति उभाभ्यांपक्षाभ्यांविनीता अपनीतानिद्रायैस्तेउभयपक्षविनीतनिद्राः अत्रसमासविषयेउभयशब्दस्थानेउभयशब्द
प्रयोगएवसाधुरित्यनुसंधेयम् यथाहकैय्यटः तत्रोभादुदात्तोनित्यमितिनित्यग्रहणस्येदंप्रयोजनं वृत्तिविषये उभयशब्दस्यप्र
योगोमाभूदुभयशब्दस्येव यथास्यादुभयपुत्रइत्यादि भवतीतिसुरवराण्युत्थानचलनाच्छद्यमानानिशृंखलानिनिगडानिकर्षंती

शय्यांजहत्युभयपक्षविनीतनिद्राःस्तंबेरमासुरवरश्रृंखलकर्षिणस्ते
येषांविभांतितरुणारुणरागयोगाद्भिन्नाद्रिगैरिकतटाइवदंतकोशाः ७२

तथोक्तास्तेतवस्तंबेरमते तेस्तंबेरमाःहस्तिनःस्तंबकर्णयोरभिजपोरित्यच्प्रत्ययविधायकेहस्तिसूत्रयोरितिवार्तिकात् इभःस्तं
बेरमःपद्मीत्यमरः तत्पुरुषेकृतीतिसप्तम्या अलुक् शय्यांतल्पंजहतित्यजंति येषांस्तंबेरमाणांदंताः कोशाइवदंतकोशाः
दंतकुड्मलाः तरुणारुणरागयोगात् बालार्करुणसंपर्कीद्हेतोभिन्नाद्रिगैरिकतटाइवविभांति धातुरक्ताइवभांतीत्यर्थः ७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीर्घेषिणि हेवनाजाक्षनीरजाक्षवनंनीरंवनंसत्वमितिशाश्वतः वनेसलिलकाननइत्यमरः दीर्घेषुपटमंडपेषुनियमिनाबद्धा वनायुदे
श्या वनायुद्देशेभवाः पारसीकावनायुजाइतिहलायुधः अमीवाहाःअश्वाः निद्रांविहाय पुरोगतान्यग्रेयायीनिलेह्यानिस्वाद्यानि
सैंधवशिलाशाकलानि सैंधवोस्त्रीशीतशिवंमणिमंथंचसिंधुज इत्यमरः वक्रोष्मणामलिनयंतिमलिनानिकुर्वंति उत्कंचसिद्धयो
गरांयहे पूर्वाह्णकालेचाश्वानांप्रायशोलवणंहितं शल्यानाहविबंधघ्नंलवणंसैंधवंवरमित्यादि ७३ ७४ ७५

दिर्घेषमीनियमिताःपटमंडपेषुनिद्रांविहायवनजाक्षवनायुदेशाः वक्रोष्मणामलिनयंतिपुरोगतानिलेह्यानि
सैंधवशिलाशाकलानिवाहाः ७३ भवतिविरलभक्तिर्म्लानपुष्पोपहारःस्वकिरणपरिवेषोद्ग्रहशून्याःपदीपाः
अयमपिचगिरंनस्त्वत्प्रबोधप्रयुक्तामनुवदतिशुकस्तेमंजुवाक्पंजरस्थः ७४

भवतीति म्लानःपुष्पोपहारःपुष्पपुंजाम्लानत्वादेवविरलाभक्तिर्विरलं वचनोभवति पदीपाश्चस्वकिरणानांपरि
वेषस्यमंडलस्योद्ग्रहेणस्फुरणेन शून्याभवंति निस्तेजस्काभवंतीत्यर्थः अपिचायंमं जुवाङ्मधुरवचनः पंज
रस्थस्तेनवशुकः त्वत्प्रबोधनिमित्तेप्रयुक्तामुच्चारितांनोऽस्माकंगिरंवाणीमनुवदति अनुरूप्यवदतीत्यर्थः इत्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतीति इतीत्थंविरचितवाग्भिः बंदिपुत्रैर्वैतालिकैः पुत्रग्रहणंसमानवयस्कद्योतनार्थं सपदिविगतनिद्रः कुमारः तल्पं ज्ञाय्यां तल्पशय्यादृढारोपियमरः उज्झांचकार विससर्ज उज्झइत्यस्माद्धानोरिजादेशियाम्प्रत्ययः कथमिव मदेनपटुमधुरं निनदद्भीराजहंसेबाधितः रूप्रतीकः सुप्रतीकाख्यः स्फरगजः ईशानादिग्गजः गंगायाइदं गांगंसैकतंपुलिनमिव नोयोत्थितंनत्पुलिनंसैकतंसिकतानामर्थमियमरः सिकताशर्कराभ्यांचेत्यण् सुप्र

इतिविरचितवाग्भिर्बंदिपुत्रैः कुमारःसपदिविगतनिद्रस्तल्पमुज्झांचकार मदपटुनिनदद्भिर्बोधितोराजहंसैःसुर गजइवगांगंसैकतंसुप्रतीकः ७५ अथविधिमवसाय्यगात्वदृष्टंदिवसमुखोचितमंचिताक्षिपक्ष्मा कुशलवि रचितानुरूपवेषः क्षितिपसमाजमगात्स्वयंवरस्थम् ७६

तीकग्रहणं प्रायशः कैलासवासिनस्तस्यनित्यम् गंगानटविहारसंभवात् इत्यनुसंधेयम् मालिनीवृत्तमे तत् ७५ अथेति अथोत्थानानंतरं अंचितानिरूचिराण्यक्षिपक्ष्माणियस्यसोऽजः ज्ञात्वेदृष्टमवगतं दिवस मुखोचितं मातःकालोचितंविधिमनुष्ठानमवसाय्यसमाप्य स्यतेर्ण्यंतालय्यप् कुशलैः प्रसाधनदक्षैर्विरचि तः संपादितोनुरूपः स्वयंवरोचितोवेषोनेपथ्यंयस्यसतथोक्तः सन् स्वयंवरस्थंस्वयंवरसभावर्तिनं क्षितिपस माजंराजसमूहमगादगच्छत् इणोगालुङीतिगादेशः पुष्पिताग्रावृत्तम् अयुजिनयुगरेफतोयकारोयुजिच नजोजरगाश्चपुष्पिताग्रेतिलक्षणात् ७६ ८ ८२ ८ ८ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायांरघुवंशव्याख्या

इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौस्वयंवराभिगमनोनामपंचमःसर्गःसमाप्तः बालाजीदीक्षितस्येदंपुस्त
कं शके १७१० विभवनामसंवत्सरेउत्तरायणेग्रीष्मऋतौज्येष्ठमासेशुक्लपक्षेएकादश्यांइंदुवारेद्वितीयप्रहर
इदं ७ ७ ७ पुस्तकं ७ ७ ७ ७ समाप्तं

यांसंजीविनीसमाख्यायांपंचमःसर्गःसमाप्तः इदंपुस्तकंगोपालाजीदीक्षितोपनाम्नाबालाजीदि०तेनलिखितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथरघुवंशेमहाकाव्येपंचमःसर्गःसमाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.12.19 16:40
,TRANSFERRED=2019/12/26 at 16:48:09
,PAGES=43
,TYPE=STD
,NAME=S0002400
,Book Name=M-2425-ATH RAGHUVANSHI MAHAKAVYA SARG-5
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection